Set 3 B/-17
(35)
# 1-108

FYBA
Sem-I
Sanskrit I

23rd Nov., 2016
3pm to 6pm
(03 pages)

**Q.P. Code : 786600**

( 3 Hours ) **[Total Marks : 100**

**N.B. :** (1) **All** questions are **compulsory**.
(2) **All** questions carry **equal marks**.
(3) **Figures** to the right **indicate marks** to a **sub-questions**.

1. केवलं द्वौ समूहौ अनुवदत । **10**

(A) (i) नवप्रवालोद्गमसस्यरम्यः
प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतोऽयम् ।।

(ii) ग्राम्यधर्मप्रवृत्ते तु कामलोभवशं गते ।
ईर्ष्याक्रोधाभिसंमूढे लोके सुखितदुःखिते ।।
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।
क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत् ।।

(B) (i) अजं रुक्मिणीप्राणसंजीवनं तं **10**
परं धाम कैवल्यमेकं तुरीयम् ।
प्रसन्नं प्रपन्नार्तिहं देवदेवं
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ।।

(ii) अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः
शौर्ये च संप्रति सशोकमुपैति धीमान् ।।
प्राप्ते निदाघसमये घनराशिरुध्दः
सूर्यः स्वभावरुचिमानिव भाति कर्णः ।।

(C) (i) अथ तया गरुडागमनकाले नीतो राजा । **10**
परमधार्मिको जीमूतवाहनस्तस्मै गरुडाय स्वदेहमुपढौकितवान् । ततो गरुडो नृपतेः पार्श्वमेकमूखादयत् । अनन्तरं पार्श्वपरिवर्तनं कृत्वापरपार्श्वमुपनीय वदति । हे महाशयखगेश्वर, एतत् पार्श्वमपि सुखेन खादित्वा निजस्थानं सर्पतु भवान् ।

**TURN OVER**



MUPD1659A VPM594 11/23/2016

(ii) रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने, सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद् वृथा ।
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

2. केवलं **द्वौ** परिच्छेदौ लिखत ।
   (i) कवचकुण्डलग्रहणवृत्तान्तः । 10
   (ii) कविः कालिदासः । 10
   (iii) पाण्डुरङ्गस्वरूपम् । 10

3. केवलं **द्वौ** उत्तरत ।
   (A) ससन्दर्भं स्पष्टीकुरुत । 10
      (i) नास्ति निष्फलता रणे ।
      (ii) शङ्खनाम्नो नागस्य माता रोदिति ।

   (B) ससन्दर्भं स्पष्टीकुरुत । 10
      (i) सर्व प्रियं चारुतरं वसन्ते ।
      (ii) शतचन्द्रं नभस्तलम् ।

   (C) 'प्रश्नोत्तरम्' इति सुभाषितप्रकारः सोदाहरणं स्पष्टीकुरुत । 10

4. केवलं **द्वौ** उत्तरत ।
   (A) (1) सन्धिविग्रहं कुरुत । 10
      (i) हंसैर्जलानि (ii) शरन्नववधूः (iii) करोम्यहम्
      (iv) भूतोऽपि (v) पटुर्न
   (2) रूपपरिचयं कुरुत ।
      (i) परिक्रम्य (ii) अद्रेः (iii) इच्छामः
      (iv) सुरैः (v) वितर्क्य

TURN OVER



MUPD16594 VPM594 11/23/2016 11:16:41 PM

(B) श्लोकपूर्तिं कुरुत । **10**

(i) विभुं _______ चरन्तं _______
स्वयं लीलया _______ दधानम् ।
_______ वृन्दकानन्ददं _______
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ।।

(ii) _______ _______ कदा विकासं? प्रिया _______ _______ किं करोति?
रात्रौ च नित्यं _______ का? सूर्योदये रोदिति चक्रवाकी ।।

(C) संस्कृतेन उत्तरत । **10**

(i) कर्णः कस्य देशस्य राजा?
(ii) वर्षायाः जलं कथं प्रवहति?
(iii) देवैः कः प्रमुखः नियुक्तः?
(iv) वेतालः राजानं किं पृच्छति?
(v) गिरिगर्भे कः स्वपिति? वनभुवि कः तिष्ठति?

5. टिप्पणीं लिखत । (केवलं द्वे)

(A) (i) नान्दी (ii) सूत्रधारः **10**
(B) (i) नवोदकम् (ii) कन्दर्पः **10**
(C) (i) चत्वारः वेदाः (ii) नवरसाः **10**
(D) (i) अमृतम् (ii) गरुडः **10**

---

MUPD16594 VPM594 11/23/2016 1:16:44 PM